ज्ञानेश्वरीसारसंग्रहः

॥श्रीगणेशायनमः॥आदिमध्यावसानिषुयःसर्वत्रशोभितः॥य
॥स्मात्सर्वंजगज्जातंनंवंदेहंगजाननं॥१॥देवीरूपस्वमेवासिद्ध
॥रूपस्वमेवहि॥तस्मात्वंदनादेवसर्वंमेवंदितंखलु॥२
॥श्रीमच्छानेश्वरचनेव्याख्यांकर्तुमधिकारः॥यद्यपिमेना
॥स्मिंतथाहस्तसाक्षेपोस्तुहं॥३॥श्रीमच्छानेश्वरचनंग्राम्य
॥वाक्शुद्धिमाप्नुयात्॥इतिश्रमोमेसफलोगंगांरध्योदकंयथा२
॥श्रीमच्छानेश्वरचनमनेकार्थरत्नैःपूर्णं॥श्रुतिशास्त्रेरवि
॥रुद्धमितियेजानंतितेबुधाः॥५॥अत्रश्रीमच्छानेश्वरःपर
॥मकारुणिकोस्मिन्कलियुगेनेकदुष्टजनाभिदुष्टमार्ग

प्रवृत्तान्धस्मिन्भवसागरेकामक्रोधादिनेकजलचरपूर्णेह
काराधनेकतरंगभरितेनिमग्नान्दमतीनवलोक्यतेषामनु
कंपयाद्रीभूतहृदयोमहासागरेनाविकोनावमिवसंसि
द्धोद्धारायस्वयंपूर्वयुगेयाकृताभगवद्गीतातस्याअर्थस्मार्ति
गंभीरतयापुनश्चावतारश्रीमच्छानेश्वररूपतयाधर्मैतत्का
लिकजनानामनुग्रहीतयाकेवलप्राकृतभाषयासर्वसार वेद
भूतंसर्वशास्त्राविरुद्धंभगवद्गीतायाव्याख्यानरूपंज्ञानेश्वर्या
ख्यंग्रंथंश्रीमहालयक्षेत्रेशिवशक्त्याधिष्ठितेकलौस्मिन्नाना
॥णसीसमानक्षेत्रेपरमपवित्रेतत्रापिमहासिद्धस्थानेमम

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नवा लक्षा श्लोको धारा यश्रीज्ञानेश्वरी रूपेण सरस्वत्यार्यादेवी अवतीर्णा
आविर्भूतेति तत्र पाषाणस्तंभे श्लोकद्वयेन लिखितवान् ग्रंथनमशक्त
॥श्रीगजाननायनमः॥ ॥ अत्रादौ विघ्नसाधनफलकामिष्टदेवतान
॥मस्कारलक्षणं मंगलं कुर्वन्शिष्यशिक्षार्थं ग्रंथोनिबध्ना
॥१॥ ॥ति॥ अत्रादौ प्रणवोच्चारणं मंत्ररूपत्वात्स्वर्णसदृश्य ॥२॥
॥स्तूयते॥ मंत्रादौ प्रणवोच्चारणस्यागमेविधानात्॥ नमः शा
॥न्द स्योन्न मोनाराचणे सावच्चतुर्थ्यंताद्वंप्रयोगोयुक्तः॥ वीरेश
॥शब्देनाशिष्टसाधनफलदात्रीस्वेष्टदेवतात्र स्तूयते॥ नमः
॥स्वस्तिस्वाहास्वधालंवषट्योगादिमंत्रेणचतुर्थी॥ नन्व

GURUKUL KANGRI DEEMED UNIVERSITY HARIDWAR MEMORIAL

त्रमंगलंकुतःकृतं॥ प्रमाणफलाभावात्॥ अत्रप्रमाणंकुत्रचिद्ग्रं
थादौनश्रुतंएवंप्रत्यक्षानुमानादिकमपिनास्ति॥ तथाफलेव्यभिचा
रोपिदृश्यते॥ तथाचकुत्रचित्कादंबर्यादौकृतेपिमंगलेसमाप्तिरूपं
फलंनजातं॥ कुत्रचिन्नास्तिकादानकृतेपिमंगलेसमाप्तिरूप
फलस्यसत्वादिति चेन्न॥ अत्रायंप्रयोगः॥ मंगलंकर्तव्यंप्रमाणफल
यशादिवत् सत्वात्॥ प्रमाणेचप्रयोगः॥ इष्टदेवतानमस्कारःश्रुतिबोधितक
र्तव्यताकःअलौकिकाविगीतविशिष्टशिष्टाचारविषयत्वात्॥ दर्शादिवत्
अत्रशिष्टाचारविषयत्वादित्युक्ते॥ नास्तिकानुष्ठितचैत्यवंदना
दौव्यभिचारः॥ अतोविशिष्टेतिविशेषणं॥ तथाचोक्तेविश्वामि
त्रादीनामयाज्ययाजनाचारव्यभिचारः॥ अतोऽविगीतेतिविशे

षणं॥ तथाचोक्तं भोजनादौ व्यभिचारः॥ अतोलौकिकेति विशेषणं॥ तथाचयथालौकिकावैदिकीतथैहिकामुष्मिकाचारविषयत्वादृष्टार्थापौर्णमासाभ्यांस्वर्गकामोयजेतेत्यादिवाक्यंश्रुतिबोधितकर्तव्यतांकतथायमपिनमस्कारस्यार्थः॥ तथाचश्रेयस्कामोमंगलमाचरेदितिसादृष्टार्थत्वदर्शनात्॥ अतएवसांख्यशास्त्रे पंचमाध्यायादावुक्तं॥ मंगलाचरणंशिष्टाचारात्फलदर्शनात् श्रुतितश्चेतिसूत्रेण॥ एतत्सूत्रप्रामाण्येनफलेप्सयाभिधावोनाशंक्यः॥ कादंबर्यादौतुविघ्नबाहुल्यात्समाप्तिर्नजाता॥ नास्तिकादौतुजन्मांतरानुचितमंगलाद्विघ्नाभावाच्चसमाप्तिरूपंफलंजातमित्यर्थः॥ ननुगणपतिस्मरणंकर्तव्यमिति ॥३॥

॥३॥

व्यासादीनामुक्तिरक्तिं॥ अत्रतंत्रतोनकृतमितिचेत्सत्यं॥ यन्मंगलंतद्वैगणपतेःस्वरूपंमंगलमूर्तिरितिगणपतौलोकेप्रयोगदर्शनात्॥ अतोमंगलकरणेनगणपतिस्मरणंकृतमित्यर्थः॥ ननुमंगलंब्रह्मणःस्वरूपंतथाचोक्तमथर्वशिरसि॥ अतिकलयाणरूपत्वान्निष्कलंकलयाणसंश्रयात्॥ स्मर्तृणांवरदत्वाच्चब्रह्मतन्मंगलंविदुरितिचेत्सत्यं॥ यईश्वरस्सएवगजमुखःश्रुतिस्मृतिसूत्रप्रतिपादितब्रह्मलक्षणस्यगजमुखेतिपदव्युत्पत्तिसिद्धत्वात्॥ तथायतोवाइमानिभूतानिजायंतेइत्यादिश्रुतयतःसर्वाणिभूतानिभवंतीत्यादियुगागमइतिस्मृतेश्चजन्माद्यस्ययतइतिसूत्रेणजगज्जन्मादिकारणरूपतटस्थलक्षणे

नयथा ब्रह्मनिर्दिष्टं तथा गजमुखइत्यत्र प्रलयेगच्छंतिसर्वाःप्रजाः यस्मिन्निति गः अत्रोणादयो बहुलमिसादिना गमधातोरधिकरणार्थेऽप्रत्ययस्तेनादिलोपःउपपदाकृतेजायंतेऽस्मिन्निति गजः अत्रापादानार्थेजनधातोऽप्रत्ययः॥ गश्चासौजश्चेतिगजः मायावच्छिन्नंचैतन्यंतदेवमुखंप्रथमंकार्यंयस्यसगजमुखइत्यर्थः॥ अत्रमायावच्छिन्नचैतन्यरूपेश्वरस्यविराड्हिरण्यगर्भापेक्षयाप्राथम्यंस्थेयं॥ एवंचगजमुखशब्देनकेवलंनिरवच्छिन्नंचैतन्यंद्योतितं॥ अतएवमुद्गलपुराणेपंचब्रह्माण्युक्तानितत्रपंचसुमध्येयन्निरवच्छिन्नंतत्तिब्रह्मसएवगजमुखइतिस्पष्टमेवोक्तं॥ तत्रापिश्रु ॥४॥ ॥४॥

तिसिद्धब्रह्मणस्पतिपदानुसारेणनिर्वचनंकृतमस्ति॥ एवंहि प्रसिद्धंब्रह्मासीत्यादीन्यपिवाक्यानिस्पष्टमेवगणपतेर्ब्रह्मतां द्योतयंति॥ अयमेवाभिप्रायःश्रीशानेश्वरैःस्वग्रंथेस्पष्टीकृतः॥ तथाचज्ञानेश्वर्यांग्रथमश्लोकेऽनमोजिआद्यारंभादिनाआमुभावनारूपमंगलकरणेनगणपतिस्मरणंकृतं तथापिश्रोतॄज्ञानायदेवादूचिगणेशुरितिद्वितीयश्लोकेनब्रह्मणासाकंगणपतेरभेदउक्तः॥ नन्वेवंसतिधात्रादोभ्रमिभिर्मंगलंकुतोनकृतमितिचेन्न॥ सर्वत्रमहतिपाद्यितग्रंथादौमंगलस्यसत्वात्॥ तथाचोंकारअथराब्दश्चेत्यद्यावेतौब्रह्मणःपुरःकंठंभित्वाविनिर्यातौतस्मान्मांगलिकावुभावितिसूत्रेनवाक्ये

नाथातो धर्मजिज्ञासाऽथातो ब्रह्मजिज्ञासेति पूर्वोत्तरमीमांसायामथ
त्रिविधदुःखात्यंतनिवृत्तिरत्यंतपुरुषार्थइति सांख्यशास्त्रादावथयो
गानुशासनमिति योगशास्त्रादौचाथशब्देन कृतत्वात्॥ गौतमप्रणी
तन्यायशास्त्रेतु प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांता
वयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासच्छलजातिनि
ग्रहस्थानानांतत्त्वज्ञानान्निःश्रेयसाधिगमइति प्रथमसूत्रे ॥५॥ ॥५॥
अथशब्दाद्यभावस्तथापिवोऽथपदार्थतत्त्वज्ञानान्निःश्रेय
साधिगमइतिपरमपुरुषार्थरूपतत्त्वकथनेनमंगलंकृतं॥
पाणिनीयेतु वृद्धिरादैच्इत्यत्रवृद्धिशब्दोच्चारणेनमंगलं
कृतं॥ तथाचशारीरमीमांसायांब्रह्मजिज्ञासेत्यत्रब्रह्मपद

व्याख्यानावसरेब्रह्मतेधातोरर्थानुगमादितिभाष्येरक्षरध्वनि
रुत्पन्नोवर्णेनोच्चार्यमाणादिसूत्रेणनकारस्यकारःअत्रसार्वधा
तुभ्योमनिजितिपूर्वसूत्रान्मनिजानुरसाब्रह्मशब्दयुक्तसंवृद्धि
रूपार्थेनव्याप्तकारयोब्रह्मशब्दस्यार्थःकृतः॥ वंचपाणिनीया
दौमंगलकृतमित्यर्थः॥ व्याकरणभाष्येवृद्धिशब्दानुसाधनमि
त्यत्राथशब्देनस्पष्टमेवमंगलंकृतं॥ शारीरभाष्येयद्यपिमंगल
द्योतकंपदंनास्तितथापीतरेतरभावानुपपत्तावित्यत्रभावप्रत्ययेन तथाधि
ष्ठेयकेवलतत्त्वस्यस्मरणात्॥ एवंचमहर्षिणीतसर्वग्रंथादौकुत्र
चिन्मंगलद्योतकपदेनकुत्रचिदनुनिर्देशेनकुत्रचिदाशीर्वचन
नमस्क्रियादिनामंगलस्यकृतत्वात्कुत्रापिदोषोनास्ति॥ नास्ति

ष्टदेवतानमस्काररूपेण मंगलस्य कृतत्वादादौ प्रणवोच्चारणस्य किं प्रयोजनमिति चेदुच्यते मयाभिप्रायः॥ आदौ प्रणवोच्चारणेन स्वकृतस्य वर्णसमूहस्य मंगादिवन्महद्द्योतनमिति कोऽर्थः अन्यार्थस्तु सूत्रे भाव्यादौ जगज्जन्मादिकारणत्वेन ब्रह्मलक्षणे कृते पि पुनः शास्त्रयोनित्वादिसूत्रेनवेदकारणत्वेन तदेवदृढीकृतं॥ तथात्रापीष्टदेवतानमस्कारेण मंगलं कृतं॥ तथापि सर्वेषु स्तुतेन ब्रह्मवाचकेन प्रणवेन तस्यैव महद्द्योतितं॥ ब्रह्मवाचकत्वं तु प्रणवस्य तस्य वाचकः प्रणवइति पातंजलसूत्रे स्पष्टमस्ति॥ नतु तस्य गणपतिवाचकत्वं नास्तीति चेन्न तस्येश्वराभेदप्रतिपादितत्वादियंशंकानोपयुक्ता॥ श्रीशानेश्वरेरपि

॥६॥

॥६॥

शानेश्वरीयग्रंथे प्रथमाध्याये अकारश्चरणयुगं उकारउदरविशालं॥ मकारमहामंडलमस्तकाकारइत्यत्र शाब्दब्रह्मरूपप्रणवस्य गणपतिस्वरूपत्वमेवोक्तवान्॥ एवं यथासूत्रभाष्यादौ जगज्जन्मादिकारणत्वेन कार्यकारणाभेदन्यायेन सर्वरूपत्वमुक्तं तथापि शास्त्रयोनित्वादिसूत्रे प्रथमवर्णके वेदकारणत्वेन कार्यकारणभेदन्यायेन शाब्दब्रह्मरूपत्वमीश्वरस्य पुनरुक्तं॥ अनेनेवाभिप्रायेण श्रीशानेश्वरैः शानेश्वर्यां प्रथमश्लोकद्वये सर्वत्रेश्वराभेदेन गणपतेः सर्वरूपत्वं यद्यप्युक्तं तथापि श्लोकद्वयादग्रे शाब्दब्रह्मरूपत्वं गणपतेः पुनरुक्तं तथात्रेष्टदेवतास्मरणेन गणपतिस्मरणे कृतेपि शाब्दरूपोंकारोच्चारणेन पुनर्गणप

यद्यपि
णा

तिस्मरणं कृतमित्यर्थः॥ कार्यकारणभेदस्तुतदनन्यत्वमारंभण
शब्दादिभ्य इत्यस्मिन्नधिकरणे शारीरभाष्ये द्वितीयाध्यायेस्य
ष्मेवोपपादितः॥ ननु सूत्रभाष्यवशानेश्वराणामभिप्रा
यइतिकुतोवगतमितिचेदाप्तेश्वरैःसूत्रकारैश्चाप्तसूत्र
सूत्रभाष्यानुसारेणमोक्षिरतीतिस्पष्टंकंठरवेणैवोक्त्वा
तू॥ अत्रप्रणवपूर्वंनमःपदेनचैनमोजिआद्येत्यादिवशानेश्व
रैःस्वसांप्रदायोद्योतितः॥ लमित्यादिनाबीजनिर्देशः वीरे
श्वरइत्यनेनस्थानमाहात्म्यंसूच्यते॥ वीरेश्वरस्थानंवदि
दमपिमहासिंहस्थानमित्यर्थः॥ वीरेश्वरसिंहस्थानंतुस्कं
दकाशिखंडवर्णितं॥ तत्रत्वयमितिहासोवर्तते॥ वेश्यान्

रसंश्रयः कश्चिद्ब्राह्मणः साध्व्यास्वभार्यया याचितः प्रसन्नः
सन्वरंददौतदातामहेशसदृशोपुत्रोस्तुतस्तदासब्राह्मणोस्यां
पथ्यांसिंहमाश्वेषसिंहकरंकिंस्थानमस्तीतिविचार्य
काशीतिनिर्धार्यतत्रगतवान्॥ तत्रायनेकानिस्थानानिदृष्ट्वा
ममस्वेषसिंहकरंकिमितिविचार्यत्रवीरेश्वरस्थानमाश्रु
त्यश्वेषसिंहकरमाप्तः॥ अत्रपंचस्वरादयोबहवोसिंहगताः
इतिनिश्चेयंयत्रविकरानामकदेवीविनायकश्चतपोविघ्नहा
रकोवीरेश्वरलिंगंचास्तितत्रगत्वातपश्चर्यांकृत्वावर्षांतत्र
सन्मानहेतुंस्तत्तदाश्रमेवसर्ववेदप्रतिपाद्यकर्महेतुभूत
मग्निनामानंपुत्रमाप्तवान्॥ अतएवतत्रोक्तंयत्रसाविकरा

MEMORIAL DR SHAU DAJI

देवी प्रकटासिंहरूपिणी॥ यत्रास्थितानां भक्तानां साक्षात्सिंहो विनश्यकः॥ निर्हृत्य विघ्नजालानि सर्वाः सिद्धीः प्रयच्छति॥ आविमुक्ते महाक्षेत्रे सिंहक्षेत्रं हितत्सरं॥ यत्र वीरेश्वरं लिंगं महाऽद्भुतमनुत्तमं॥ त्रिलोक्यांपि नो काश्यां भूमिर्लिंगं विनाकचित्॥ परं वीरेशसदृशं नलिंगं क्वाऽपि सिंहदं॥ धर्मदंचार्थदं सम्यक्कामदं मोक्षदं तथा॥ यथा वीरेश्वरं लिंगं काश्यां नान्यत्तथा ध्रुवं॥ पंचस्रोत्रगंधर्वः परांसिद्धिमगात्पुरा॥ विद्याधरः स्वच्छविर्योवस्त्रघ्राणश्रियुत्सराट्॥ नृत्यंतीनिजभावेनपुराद्योकाप्सरोवरा॥ सदाकोकिलानामलिंगमध्येलयंगता॥ ऋषिर्वैद्यरीनामनामजप्तेश्वरुद्रियं॥ मं

॥८॥

त्रज्योतिर्मयेलिंगेसधानीरोविशत्पुरा॥ चंद्रमौलीभरद्वाजावुभौपाशुपतौतदा॥ वीरेश्वरंसमभ्यर्च्यगायमानौलयंगतौ॥ दाक्षायणीहिनागेंद्रोस्वफणामणिभिर्निशि॥ षण्मासान्सिंहमूर्तिमद्भुतांराजतेरिह॥ किन्नरीहंसपद्मत्रभर्त्रावेणुप्रियेणवै॥ गायंतीसुस्वरंयातापरोनिर्वाणभूमिकां॥ असंख्याताःसहस्राणिसिंहाःसिंहमहोगताः॥ सिंहलिंगमिहाख्यातं तस्माद्वीरेश्वरंपरं॥ वीरेश्वरंसमाराध्यभ्रष्टराज्योजयद्रथः॥ हत्वारिपून्स्वलितंराज्यंप्राप्यविदेहजः॥ विदूरथोधृतपतिस्पुत्रःपुत्रवानभूत्॥ वीरेश्वरंत्रिसंध्यंनमेराधाधिपतिर्वशी॥ वसुदत्तोत्रचंद्राणिकुंतीवसुसुतोपमः॥ आ

दमभ्यर्च्य वीरेशं रत्नदंडोधमासुखात् ॥ अत्रचाविमुक्ते महाक्षेत्रेसुखेन
स्थेदौभ्रुवोर्घ्राणस्यचयः संधीयतेविमुक्तस्थानमुक्तंतथायसिंडेतद्ब्रह्मां
डमितियद्ब्रह्मांडेआविमुक्तस्थानेकाशीक्षेत्रंसेयंनिसृष्टिः ॥ एवंचयथा
शरीरस्यपवित्रभागेतीर्थक्षेत्रादयःसंति ॥ अपुपवित्रभागेतुदाघव्रणका
तथाब्रह्मांडस्यपवित्रेभागेतीर्थक्षेत्रादयःसंति ॥ अपवित्रेऽमेध्यस्था
नानिसंति ॥ तथाचोक्तंस्कांदे ॥ भौमानामपितीर्थानांपुण्यहेतुकारणंशृ ॥९॥ ॥९॥
णु ॥ यथाशरीरस्योद्देशाःकेचिन्मेध्यतमाःस्मृताः ॥ तथापृथिव्यामुद्दे
शाःकेचिदुपुण्यतमाःस्मृताः ॥ तस्माद्भौमेषुतीर्थेषुमानसेषुचनित्यशः
उभयेषामपिवाराणसीयातिपरांगतिं ॥ ननुपिंडेआविमुक्तस्थानं
कुत्रोक्तमितिचेच्छ्रुतावेव ॥ तथाचश्रुतिः ॥ यएषोऽनंतोव्यक्तआत्मा

सोविमुक्तेप्रतिष्ठितः ॥ सोविमुक्तःकस्मिन्प्रतिष्ठितःवरणायांनास्यांचमध्येप्रतिष्ठितः ॥ कतमावरणाकतमानासीति ॥ इमौतेनासिकांवरणानासीतिनिरुच्यकतमेचास्यस्थानंभवतीति ॥ भ्रुवोर्घ्राणस्यसंधिःसएषद्युलोकस्यपरस्यचसंधिर्भवतीति ॥ ननुआत्मासोविमुक्तेप्रतिष्ठितइत्यत्रकिंजीवोवेश्वरउतेति चेद्वैश्वानराधिकरणेस्वेश्वरत्वमात्मनंतिचैनमस्मिन्नितिसूत्रेस्पष्टीकृतं ॥ तथाचैव्यस्तसमस्तवैश्वानरोपासनमुक्तं ॥ तत्रतस्याद्देशमात्रपरिछिन्नादिलिंगैर्जीवबहुविधयकविनादेप्रासेसतितस्यसर्वात्मत्वादिलिंगैरीश्वरंसंस्पर्शमानमनुमानेनादिसंभवेपिस्पष्टीकृतं पुनरपिश्रुतिनिरूपणन्यायेनाभिव्यक्त्यादिहेतुभिस्तदेवोक्तमासं

पत्तेरित्यत्र प्रादेशमात्रमिहवेदेधारतिश्रुतानुसारेणमूर्धादिचुबुकां
तेषुषट्सुस्थानेषुतत्प्रादेशमात्रत्वंसंपद्यमानंकृत्वाआमनंतिचै
नमस्मिंश्चितिचरमेसूत्रेएनमीश्वरमस्मिन्मूर्धचुबुकांतवर्तिस्था
नेआविमुक्तायेजावालाआमनंतीतिस्मईश्वरबोधिकाश्रुतिः
॥१०॥ यएषोनंतइत्याद्युदाहृता॥समस्तवैश्वानरोपासनंतुप्रत्यगात्मनःकर्तृत्व ॥१०॥
ज्यायस्त्वंतथाहिदर्शयतीत्यधिकरणेयुणोपसंहारपादेस्थापीकृतं
एवंचयथापिंडेनासाग्रसंधौवाविमुक्तईश्वरस्थानंसिद्धमासुपा
स्यमुक्तंभ्रूमध्यादीश्वरस्थानंसिद्धोपसनायोग्यमाविमुक्तेक्षेत्रेका
श्यामुक्तमितिभावः॥अभिलाषाष्टकेवीश्वरस्तोत्रेतु॥एकंब्रह्मसै
वाद्वितीयंसमस्तंसत्संसत्तेहनानास्तिकिंचिदित्यादिनाकेवल

ब्रह्मरूपेणसुप्रतिष्ठितं॥तथाचात्रवीश्वरपदेनवीश्वरास्यस्थानव
द्देहंसिद्धस्थानमित्यर्थः॥अत्रचास्यवचनस्यमंगलसंपुटितस्यमध्ये
मध्येमंगलद्योतकपदैर्युतंतथोपासकानामिदंवचनंमहामंत्रवन्मं
गलरूपंभवतीवामहामंगलरूपोर्थोवास्तीतिशेषं॥नन्विदंवचनंमहा
मंगलरूपमितिकथंज्ञातमितिचेद्यथाबोधायेषुद्वैताद्वैतविष
येषुसंशयेद्वैतलिंगैःपूर्वपक्षेप्राप्तेसति॥उपक्रमोपसंहारादि
षड्विधाद्वैतद्योतकलिंगैःसमन्वयाधिकरणादावद्वैतरूपोर्थो
वधारितः॥तथानस्थानतइत्यादिभूम्यादिरूपत्वमपिनिराकृत्यद्वै.
तरूपोर्थोवधारितः॥तथातन्नदधिकरणेउक्तलिंगैरेवाद्वैतमुक्त
तानिलिंगानिच॥सएषोणिमाएतदात्म्यमिदंसर्वंतत्सत्यंसआत्मा

तस्मात्सिध्येत केनोइति छांदोग्ये षष्ठप्रपाठकादौ स्पष्टानि सेति
तद्वदत्रापि ॥ उपक्रमेता वन्मंगलमुक्तप्रकारेण कर्तुमुपसंहा
रेच मंगलं महाश्रीरित्यनेनस्पष्टं मंगलं कृतं ॥ तथाध्यय
॥११॥ ध्येविंवार्थमखंडवर्तिविडिमादिभिर्मंगलवाचकपदानाम
भ्यासो दृश्यते ॥ सर्वत्रजंतुर्दृश्यनेनमंगलरूपफलक ॥११॥

॥ ॐनमोलंबोदराय ॥

अथनमस्यास्ति ॥ इतिमांसेसकांक्षितमिसादिभिरपूर्वरूपमंगला
र्थोदृश्यते ॥ पूर्वोक्तश्लोकयोरर्थवादरूपेणमंगलरूपोर्थोदृ
श्यते ॥ तथोपपत्तावुक्तायांगौरिसादिनामंगलरूपार्थकथनं
एवंचात्रष ॥ विधालैंगैमंगलरूपार्थकथनंकृतमुपासकानां

यमहन्मंगलंभवतीतिकथितमितिभावः ॥ मंगलरूपार्थकथ
नंतुग्रंथेस्पष्टंभाविष्यति ॥ उपसकानांमंगलकथनंतुग्रंजंतुदृमं
गलंमहाश्रीरित्यत्रस्पष्टमस्ति ॥ एवंचात्रमंगलरूपोर्थोस्तीति
शंकरभाष्युक्तिंदृष्ट्वाकथितः ॥ समंगलरूपार्थस्यज्ञानेका
र्थैःश्रुतिसूत्रभाष्यप्रकरणपविरुद्धैःकर्तव्यः ॥ महद्ब्रह्मस्वरू
पादिवदलंकारएव ॥ अत्रचयथाबुध्यामयार्थःक्रीयते ॥ नास्वि
दमस्तु ॥ अत्रवीरेश्वरपदेनवीरेश्वरस्थानंवादिंसिंहस्थाने
मितिकथमुक्तमितिचेन्नदोषःस्यात्तुभवनोपपादयति ॥ पिताम
हेति ॥ पितामहेनब्रह्मणा ॥ पितामहोविरिंचौस्यात्तातस्यजनकेपि
चेतिमेदिनी ॥ पूर्वंस्रष्टेःप्राक्कालेजगद्गुरोःसर्वधर्मोपदेष्टुः

परमेश्वरात् ॥ अत्रचेश्वरः सर्वविद्यानामिसादिश्रुत्यासंभवे
गुरवेनमइत्यादिस्मृत्याचेश्वरस्यैवसर्वजीवानांश्रुतिद्वारापर
मपुरुषार्थसाधनधर्मोपासनशानायुपदेष्टृत्वमेतदेव
शास्त्रयोनित्वादित्यस्मिन्नधिकरणेअस्यमहतोभूतस्यनिश्व
सितमेतद्यदृग्वेदयजुर्वेदसामेत्यादिवाक्यंपुरुषस्यधर्मादि ॥१२॥ ॥१२॥
नेकसाधनबोधकवेदकर्तृत्वेनसिद्धम् ॥ योगशास्त्रेचापि ॥
सर्वेषामपिगुरुःकालेनानवच्छेदादित्यस्मिन्नत्रेजगद्गुरुत्व
मीश्वरस्यैवस्पष्टमुक्तमस्ति ॥ अनुअनादिनिधनानित्यावागुत्सृष्टा
स्वयंभुवा ॥ आदौवेदमयीदिव्यायतःसर्वाःप्रवृत्तयइत्यादिनेश्व
रस्यवेदकारणत्वंनघटते ॥ सांख्यशास्त्रेतेष्वपौरुषेयत्वंनवेद

स्यप्रामाण्यमुक्तंनतुईश्वराभावेन ॥ तथाचतत्रकपिलस्मृतेः
पंचमाध्यायेनित्यैश्वरपौरुषेयावेदस्तदर्थस्यातीन्द्रियत्वा
दित्यस्मिन्सूत्रेऽपौरुषेयत्ववेदस्योक्तंतस्मादेवधर्मप्रवृत्तिः
नयज्ञादेःस्वरूपतोधर्मत्वंवोधित्वादित्यस्मिन्सूत्रेऽुक्तं ॥

॥पितामहेनयत्सूर्यंत्वद्वषदंजगद्गुरोः ॥

नन्वनित्यत्वंवेदानांकार्यत्वश्रुतेरित्यस्मिन्सूत्रेतेवेदानां
कार्यत्वंस्थीकृतमितिवाच्यं ॥ कार्यपदार्थस्यपौरुषेयपदार्थो
पेक्षयायस्मिन्नदृष्टेपिकृतबुद्धिरुपजायतेतत्पौरुषेयमि
तिसूत्रेणार्थांतरेतैःस्थिकृतत्वात् ॥ पूर्वमीमांसकानांतते
पिवेदस्येश्वरजन्यत्वंनास्ति ॥ तथाचकथमीश्वरस्यवेदका

रणयुक्तेनजगद्गुरुरुक्तमिति चेन्न॥ईश्वरेणपूर्वकल्पस्थवेदस्यतत्रा
नुसन्धानेनसहकल्पान्तरेणवेदस्यनिसर्गेईश्वरकर्तृत्वेचसंभवात्॥
सांख्यमतंतुईश्वरनाधिष्ठितप्रधानाधिकरणेरजस्तमोदिहेतुभिर्नि
राकृतं॥न्यायमतेतुईश्वरजन्यत्वेनवेदस्यप्रामाण्यमुक्तं॥अतोज॥१३॥
॥१३॥ गद्गुरोःपरमेश्वरासूर्यस्यैःप्राक्कल्पेयद्वेदरूपंसरस्वत्याख्यंबिं तथाचश्रुतिः
बार्धबिंबस्यस्वप्रकाशस्यान्यार्थप्रकाशकस्य॥नतत्रसूर्योभा
तिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः॥तमेवभांतम
नुभातिसर्वंतस्यभासासर्वमिदंविभातीति॥तस्यापरिमितप्र
काशस्यार्धमंशरूपंग्रासं॥एतेनेश्वरेपरिमितप्रकाशस्यार्धांश स्मा
कं॥तथाचवेदेहिसर्वार्थप्रकाशनरूपांशाकेरूपलभ्यते

तेनयोयत्कर्तासतदधिकश्चरतिन्यायेनेश्वरेअपरिमितप्रकाश
मुपलभ्यते॥एवमपरिमितप्रकाशकस्यार्धशब्देनसमांश
वेनवाच्यं॥तथाचस्कंदेब्रह्मणस्तपश्चर्यादिभिःसंतुष्टाज्ज
गद्गुरोःसकाशाद्वेदरूपाविद्याप्राप्तेतिपुराणादावुक्तमस्ति॥अ
नेनैवाभिप्रायेणश्रीशुकैर्द्वितीयस्कंधेउक्तं॥प्रचोदितायेन
पुराससरस्वतीवितन्वताजस्यसतींस्मृतींहृदि॥स्वलक्ष
णाप्रादुरभूत्किलास्यतःसमेऋषीणामृषभःप्रसीदतु॥
तेनैववेदस्यरणेनपूर्वसृष्टिंसाधुयेतथाकरोत्॥तथा
॥चइतेअस्त्यमिंदवाक्षरःपवित्रमाशवः॥विश्वान्यभि
सौभगासदिश्रुयाकमेणब्रह्मास्रष्टिंकृतवान्॥तथाचोक्तं

WEWILL RESTORE

एतस्मिन्नंतरे वै प्रजापतिर्देवान् सृजन् अस्त्रमिति मनुष्यान् इंद्रियमिति पितॄन् क्षेत्रमिति यक्षान् आशा इति स्तोत्रं विश्वानीति शास्त्रमभिसौभगेत्यन्याः प्रजाः इति ॥ पूर्वसृष्टिसदृशान् सृष्ट्वा तु सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदिति श्रुतिः प्रमाणं ॥ तथास्मृतिरपि ॥ भूतानां मृधेयामिया ब्रह्मवेदेषु दृश्यदर्वर्यते प्रसूतानां तान्येवेभ्यो ददाति सः ॥ यथर्तुवर्तुलिंगानि नानारूपाणि पर्यये ॥ दृश्यंते तानि तान्येव तथाभावा युगादिषु इति ॥ तथाच पितामहेनास्त्रेः प्राकालेतपश्चर्यादिभिः संतुष्टाज्ञगुरोस्त्वादितिवत्तेर्यस्यरक्षार्थं सुदर्शनचक्रं महातेजोधिरूपं प्रासं तच्चदामयाकुरुणाधिष्ठितं तदाप्रतिमाप्रतिमानदेव

रूपं दक्षदृष्टिकातलेसाहितं मयद्वारेणस्थापितमिंद्रेमथाचस्कंदे महालये महालयमाहात्म्यासंसन्नकुमारसंवादे यदातारकासुरात्सर्वेषांदेवानांभयमुत्पन्नं तदातेब्रह्मणशरणंगताः ॥ तदाब्रह्मापिविष्णुंप्रतिदेवैः सहशरणंययौ ॥ तदाविष्णुनोक्तमयंकालोतद्वधस्यनास्ति ॥ कंचिन्कालंप्रतिक्षाकर्तव्यापुनर्ब्रह्माब्रवीत्तावत्कालपर्यंतमस्माभिः कुत्रस्थेयंततोविष्णुराह ॥ गोदायादक्षेणतटेपंचक्रोशसकलालयसंज्ञकंक्षेत्रंमर्धचंद्राकारंवरापर्यंतंदेव्यामहास्थानमस्ति ॥ तत्रत्रिगुणात्मिकामहाशक्तिरास्तेतत्रभवद्भिस्तारकवधकालपर्यंतंस्थेयंसासर्वेषांयुष्माकं

रक्षां करिष्यति ॥ अतस्तां प्रति शरणं गतव्यं ततस्ते विष्णो राज्ञ
मातस्मिं स्थानं गत्वा देवी मस्तुवन् ततस्तां स्तोत्रेण देवीप्र
॥१५॥ सन्ना प्रदाजाता ततो ब्रह्मणा स्ववृत्तांतः तारक चेष्टितादि
कथयित्वा अत्रास्माकं रक्षणं कुरु इति सामाचितां तां देवी
मंकुरुष्वेन सहात्रमवतारेणं करिष्यामि रुद्रं प्रसन्नं कुरु ॥१५॥
ततो ब्रह्मादिभिः स्तोत्रैः स्तुतः प्रसन्नश्च तः तं प्रति स्ववृत्तंक
थयित्वा तारकवधकालमर्यंतं कात्रास्माभिस्थेयं तत्स्थानं
दर्शयत्रत्वं मस्माकं रक्षणं चकुरु इतिमाचितं ॥ ततः शि
वेनोक्तं त्रमागच्छ देवी सुतात्रस्थेयं तत्रवारक्षणं देव्या
सहकरिष्यामि ॥ ततः सर्वे देवाः शिवज्ञप्तिकुराशिन्ना तू

आस्थिताः मध्ये कचित्संभूतैः स्थापितभूतनाथरक्ष्यास्यामिकाक
थयित्वा ततः सनत्कुमारं प्रतितत्र चतुर्थोध्यायेव्यासप्रश्नः ॥ म
हात्मयेक्षत्रनरोस्थितः श्रीमुः सनातनः महालक्ष्मीस्थितात्रदृश्य
दृश्यस्वरूपिणीकेनसानिर्मितापश्चास्थिलापीभुवनेश्वरीति ॥
एवमुक्त्वा अन्येपिप्रश्नाः कृताः ततः सनत्कुमारेण केचि
त्प्रश्ना नामाख्यामिकाद्वारेणोत्तरं दत्तं पुनरष्टादशाध्यायेव्यासः
प्रश्नः ॥ अदृश्यासर्वलोकानांशक्तिरासीन्मयाश्रुतंततोब्रह्मसु
तासर्वश्रुतंदेव्यापरंमया ॥ शिलातलेसुचिन्मस्माकदाकेनसु
पुजिता ॥ एतन्मेकथयब्रह्मन् यदितुष्टोसिमेप्रभो ॥ ततः सन
त्कुमारः प्रत्यक्षतरं दृष्टवान् ॥ पूर्वंशांडिल्यनामाऋषिः सर्वभूता
नुकंपार्थं कुरुक्षेत्रादिषुमहाध्यरान् चकारतत्रतत्रांतरायान्
दृष्टवाविष्णुं प्रतिशरणगतः ततोआकाशवाणी जाताहेशांडि

त्यत्यं महात्यमंक्षेत्रं गत्वा यज्ञं कुरुतइति नतः समहात्मागत्य
प्रारंभं कृतवान् नत्रसरस्वती महादेवी तस्मिन्यज्ञे आगतां सदृष्ट
वान् ततः तया सहसहतस्य क्वचित्संवादोजातः ततस्तां प्रति
सामोजनैमया-येतत्सोब्रवीत् ब्राह्मणान्भोजयित्वात्वां प्रति
अन्यंश्रमछामितत्सासरस्वति कुपितासतीतत्रस्वंसर्वमिष
यमासतदृष्ट्वादांडिल्योमूर्छितोजातः ततःसादेवी सरस्वती प्र
तिब्राह्मणमुत्थापयेत्याहततःसाब्राह्मणंप्रति स्वदृष्टिपाते
नोत्थापयामासंजीवयामासततः सःदेवीवरंवृणीष्वेतिआह सत्वंत्रैअत्रत्यंतिष्ठयेत्रत्वांभजि
ष्यंतितेषांमनोभिलषितंकुरुततः देव्याहममदैवतंविष्णुं

आदौप्रसन्नंकुरुततोमांभजस्वतथैवकृतवान् ततोदेव्यास्थानंदर्शितं
ततः देवीप्रतिमार्थंतेनविश्वकर्मद्वारामयाहृतः ततस्तेनाहूतंरूपंदृ
ष्ट्वाअस्याः प्रतिमामयाराधयासिइतिब्रह्मलोकमतोतस्मैतद्रूपंनिवेदित
वान् ततोब्रह्मासरस्वतीप्रतिमांतांप्रतिदत्तोंग्रहित्वासमहालयेआगतः
इतिआख्यायिकासिअतब्रह्मणादेव्याःप्रतिमांप्रतितेजःस्थापितमिति
सिद्धं॥ यद्वाजगद्गुरोःबिंबस्यापरिमिततेजसःपृथ्वींदृष्ट्वातथारूपंततआ
त्मनोर्धंवैजायाभवतितिवाश्रुतं॥कथंभूतंबिंबार्धं॥अरवंडवतिअरवंडं
कालत्रयेनिरंतरंवर्ततेतदरवंडवति॥एवंचेबिंबार्धमित्यनेनज्ञानरूपत्वं
सूचितं॥अरवंडवतिपदेनसद्रूपत्वंसूचितं॥अथवाअरवंडेब्रह्मणीवृत्ति
र्तेतवखंडवतिब्रह्माश्रितारक्तिरित्यर्थः ब्रह्मणस्त्वखंडत्वं॥नव्यापिवा
देहात्तोतिरिक्तत्वाभापिकालतः॥नवसक्तोपिसावतिस्यादर्थेब्रह्मणि
त्रिभेदादिवाक्येरखंडसच्चिदानंदमित्यत्राखंडपदस्यव्याख्यानात्पुनः
कीदृक्बिंबार्धंसंसत्॥सम्यक्वैराग्यादिसाधनैःसादयतिनाशयतिअन

र्थ भ्रांतान् रतिसंसत्॥ अत्र सत्सद्विषदुहदृहुजादिभिर्दकिदृजिनिरा
जामुपसर्गादि क्विप्रत्ययेनसूत्रेणात्वोपसर्गेऽपपदेक्विप्प्रजातःएवं च
संसदिनिपदेनसवीदुःखोच्छदृत्पार्थकत्वेनानंदरूपार्थसूचितःएवं
चत्रिभिःपदैःसत्यज्ञानानंदरूपंब्रह्मेतिसूचितं॥ महासम्यक्विश्व
पालनादिहेत्वादिभिःसादयतिनाशयतिमहिषादिदुष्टान्त्रिगुणात्मि
काअनादिशक्तिरित्यर्थः॥ उक्तंच॥त्रिगुणासामहालक्ष्मीःसाक्षान्म ॥१७॥
हिषमर्दिनीति॥ महत्त्वंमहत्तत्वेविद्याधिकाग्रदेयत्वात्त्रिगुणासाम
हालक्ष्मीरितिकथ्यते॥ विद्यारूपत्वात्किंपक्षेतुसम्यक्पदवाक्यप्रमाणा
दिभिःसादयतिनाशयतिसोगतादिकुतर्कपथंरतिसंसत्॥ अत्रपदत्रयेन
व्याकरणंबोध्यंवाक्यत्रयेनपूर्वोत्तरमीमांसाशास्त्रंहेयं॥ प्रमा
णत्रयेनगौतमकणादमयोहेयाअत्रार्थेबोधार्थमितिपदेनप्रकाशरूपा

र्थकेनसत्गुणोद्योत्यतेअस्तिपदेनकेवलस्थितत्वरूपार्थकत्वे
नतमोगुणोलक्ष्यते॥ तथाचास्यादयःसमोगुणस्यभव्यउक्ताः॥
संसदिनेनरजोगुणोलक्ष्यते॥ दुष्टादिनाशनंतुबोधोद्यावेभवंति
नानेयभवतिक्रोधादयस्तुरजोगुणस्यविकाराःप्रतिभाविसिद्धाः॥ संति
एवंचत्रिभःपदैःत्रिगुणाशक्तिरुक्तेत्यर्थः॥ ननुएकेनपदेनस
द्रूपार्थेसिद्धेशक्तिरूपार्थेसिद्धेअन्यपदयोःकिंप्रयोजनमितिचे
न्नअस्तिपदेनकेवलसद्रूपंबोधितंतत्किंजडमस्तिवाप्रकाश
रूपमस्तिरितिबोधस्तुनजायतेअतःबिंबार्थपदेनप्रकाशरूपत्व
मुक्तंएवंचास्तुसच्चिद्रूपंब्रह्मतत्किंदुःखरूपमस्तिवासुखरूपमस्ति
रितुबोधोनजायतेअतःसंसदितिपदेनसद्दुःखनिवर्तनरूपत्रयो
जनबोधकेनसुखरूपलक्षितं॥ एवंपदत्रयमस्परस्पराश्रयेक्षावत
तेतेएतदेवअसुणःस्वरूपलक्षणंश्रुतिषुसच्चिदानंदपदैर्दर्शितं॥

मे पदत्रैणे कार्थो निरवछिन्नअखंडैकरसस्वरूपउक्तइत्यर्थः॥एतेनजन्मा
द्यस्ययतइतत्रश्रुतेः स्वरूपकथनेअनेनपूर्वेतरपदैः संबंधस्य
सूचितमस्ति॥लक्षणं च॥अतिव्याप्त्यव्याप्तिसंभवपदोषभ्रमरहितं
॥३८॥ कार्यं॥अतिव्याप्तिर्नाम॥लक्ष्यतावच्छेदकसामानाधिकरण्येसति॥ ॥३८॥
लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगितासंबंधसामानाधिकरण्यं॥यथागोः
शृंगित्वमितिलक्षणेकृतेश्रृंगित्वस्यमहिष्यादौअतिव्याप्तिः॥अव्याप्ति
र्नाम॥लक्ष्यतावच्छेदकसामानाधिकरण्येसति॥लक्ष्यतावच्छेदकावच्छि
न्नात्यंताभावप्रतियोगित्वं॥यथागौः कपिलत्वमितिलक्षणेकृते
श्वेतेनगवितस्याव्याप्तिः॥असंभवोनामलक्ष्यमात्रावृत्तित्वं॥यथागो
रेकशफत्वादिलक्षणेकृतेगोमात्रशाद्वैकशफत्वेनास्यलक्षणस्यतत्रासं
भवः॥एवंचलक्षणस्थलेलक्ष्यंपक्षीकृत्यतत्तद्भेदंसाध्यंकृत्वाहेतुत्व

नेलक्षणंनिरूप्यपृथ्वीतरेभ्योभिद्यतेगंधवत्वादित्यादिघटितेरेवानुमा
नेनलक्षणंकार्यैरित्यर्थः जगज्जन्मादिकारणरूपंतुश्रुतेस्तटस्थल
क्षणंस्वरूपलक्षणंत्विदमेव॥तटस्थंचलक्ष्यमात्रावृत्तित्वेसतियथा
वर्तकं॥यथाचजगज्जन्मादिकारणत्वस्यपारमार्थिकस्याश्रुतेरपिअन्यथासिद्ध्यभावर्तकत्वात्तटस्थलक्षणत्वं॥यथाशास्त्रयोनित्वंईश्वरसुतेश्शा
स्त्रसंबंधस्यवेदेआवृत्तेरपिअन्यनिवर्तकत्वंभवतीतद्वदेवेत्यर्थः॥
एतादृशंसच्चिदानंदसकलत्रिगुणात्मकंशक्तिरूपंवाविद्याशक्तिरूपंवा
दृष्टरूपांदेवीं प्रतिमांश्रुतेराहितामित्यर्थः॥अत्रप्रतिमायाः दृष्ट
सबंधस्तुव्याससस्मादित्यधिकरणाद्बोध्यः॥विद्याशक्तिपक्षेतुअखंड
वर्तिविशेषणं॥वेदांतिस्तुतेनयोज्यं॥ईश्वरस्यसुगमत्वंकल्पवेदस्मर
णात्ईश्वरजन्मत्वबोधकश्रुतिविरोधोनास्ति॥प्रतिमाग्राह्यतामिश्रा
धाराधिहोत्रीकथमितिचेत्यथेक्षणंकृत्वाउपास्यध्यानंव

सरतिसूत्रेण व्यवस्थकामरिपंतहादेव्यामहत्सजोसूयामअत्रास्थित
त्वेनस्वनेमहात्म्यंवर्णयित्वास्वानुभवेनैवउपासकानांसादितसिद्धि
करंभविष्यतीत्यभिप्रायेणाहतीयश्लोकेवीरेश्वरसिद्धस्यनवदिदंसि
॥४९॥ ध्यंस्थानमितिअर्थद्वयंवदति॥अथमयाकृतोयंग्रथःसर्वेषांदरहस्य ॥४९॥
बोधेकःतद्रूपेणसाक्षात्सरस्वतीरहस्यज्ञानीलोकोधारामममनुस्वात्मि
र्गतान्त्विदंममसामर्थ्यमितिस्वामिमानंनिवर्तयन्नाह॥दातमेति॥अ
त्रमयापूर्वेक्तंतेजोऽथेगौयमनियमादिसाधनैर्यदाभावितंतदामोगै
र्मनसिविद्रुतातेजोमयशक्तिरूपेणपूर्वेक्तंतेजःप्रकाशितक
तमितिभावः॥तथाचपूर्वेक्तंतेजःयमनियमादिसाधनैर्मनसिसि
द्यशक्तिरूपेणप्रस्फुरितमित्यर्थः॥अत्रमुजधातोःकरणार्थेअकर्तरि
चकारकेसंज्ञायामितिसूत्रेणघञ्चजोःकुघिण्ण्यतोरितिसूत्रेणकुत्वं
॥तथाच॥मुंजंतिध्येयेसाधकाएभिःसोधनैस्तेयोगसौरित्यर्थः॥तथा

चयोगशास्त्रेसाधनानुक्तानिसंतितत्रादौउद्देशेनयमनियमासनप्रा
णायामप्रत्याहारधारणाध्यानसमाधयोष्टावंगानीत्युक्तापृथक्पृथ
क्तेषांलक्षणान्यपिकथितानितत्राहिंसासत्यमस्तेयब्रह्मचर्यपरिग्रहाम
माः इतियमलक्षणमुक्तानियमलक्षणमुच्यते॥शौचसंतोषतपःस्वाध्या
येश्वरप्रणिधानानिनियमाइतिएवंयमनियमलक्षणेउक्तातत्फलान्ये
पिमध्येकथयति॥अहिंसाप्रतिष्ठायांतत्संनिधौवैरत्यागः सत्यप्रति
ष्ठायांक्रियाफलाश्रयत्वं॥अस्तेयप्रतिष्ठायांसर्वरत्नोपस्थानं॥ब्रह्म
चर्यप्रतिष्ठायांवीर्यलाभः॥अपरिग्रहस्थैर्यजन्मकथंतासंबोधः॥
शौचात्स्वांगजुगुप्सापरैरसंसर्गः॥सत्त्वशुद्धिसौमनस्यैकाग्र्येंद्रियजय
योग्यत्वानि॥संतोषादनुत्तमसुखलाभः॥कायेंद्रियसिद्धिरशुद्धिक्षया
त्तपसः॥स्वाध्यादिष्टदेवतासंप्रयोगः॥समाधिसिद्धीश्वरप्रणिधानात्
॥इतियमनियमसाधनफलान्युक्त्वाआसनमाह॥स्थिरसुखमासनमिति

यथा स्थिरं सुखमासनं भवति तथा कर्तव्यमित्यर्थः ॥ आसनस्थैर्यं तूपदेशादि रहितदेहास्थितत्वेन भवति अनेनैवाभिप्रायेणभगवद्गीतादौ योगस्थानानि उपदेशरहितान्युक्तानि ॥ शारीरकेचतुर्थाध्याये तु मत्रैकाग्रतातत्राविशेषादिति सूत्रेण मत्र मनसरेकाग्रतामवतिति त्रोपासनं कर्तव्यमित्युक्तं ॥ आसनस्थसुखरूपत्वंतूपदेशाद्यनादिनाभवति इतितत्रैवासीनःसंभवादित्यत्रोक्तं ॥ आसनभेदप्रकारं प्राणायामाच्चदिप्रकारंचचतुर्थवर्णके वक्ष्यामः अत्रतुसंक्षेपतः कथ्यतेरेचकपूरकसंकुंभकलक्षणमाह ॥ ततोद्वंद्वानभिघातः ॥ तस्मिंध्यप्राणायामाहः ॥ तस्मिन्सतिश्वासप्रश्वासयोर्गतिविच्छेदःप्राणायामः ॥ प्राणायामभेदमाह ॥ बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टोदीर्घसूक्ष्मः ॥ चतुर्थप्राणायामलक्षणमाह ॥ बाह्याभ्यंतरविषयाक्षेपीचतुर्थः ॥ सूत्रद्वयेन प्राणायामफलमाह ॥ ततःक्षीयते प्रकाशावरणं ॥ धारणासुयोग्यतामानसः ॥ प्रत्याहारमाह ॥ स्वविषयासंप्रयोगेचित्तस्वरूपानुकारइवेंद्रियाणांप्रत्याहारः ॥ तत्फलमाह ॥ ततःपरमावश्यतेंद्रियाणां ॥ एवंयोगस्यपंचबहिरंगानुक्त्वाक्रमसंतरंगमाह ॥ तत्रादौधारणालक्षणं माह ॥ देशबंधश्चित्तस्यधारणा ॥ ध्यानलक्षणमाह ॥ तत्रप्रत्ययैकतानतेतिध्यानं ॥ समाधिलक्षणमाह ॥ तदेवार्थमात्रनिर्भासंस्वरूपशून्यमिवसमाधिरिति ॥ एतत्त्रयमेकत्रसंयमः ॥ एतत्संयममात्रेणैवसिद्धिर्भवति ॥ एतदेवयोगशास्त्रविभूतिपादेतत्संयमात्ततःसिद्धिर्भवतिसूत्रं ॥ तत्रयदीश्वरसंप्रश्नोतितदीतत्रेश्वरप्रसादान्निर्विघ्नंयोगसिद्धिर्भविष्यतिअतएवोक्तं ॥ तत्रतिष्ठेतिस्थैर्यमेकतत्त्वाभ्यासइतिवेत्रप्रतिषेधार्थमित्यर्थः एवमुक्तंचित्तप्रसादसाधनमाहमैत्रीकरुणामुदितोपेक्षाणांसुखदुःखपुण्यापुण्यविषयाणांभावनातश्चित्तप्रसादनमितियोगशास्त्रेअन्येकानिसाधनान्युक्तानि ॥ ननुरत्ने

DR. BHAU DAJI

नयोगः प्रसुक इत्यस्मिन्नधिकरणे योगमतरबंडितमिति-चेन्नात्रापि साधनादिपक्षोनखंडितः किंतु कारणपक्षः खंडितः एतदेवतत्रैवभाष्ये कृद्भिः स्पष्टीकृतं योगस्मृतिन्यायेन कानिश्रुतौश्वेताश्वतरोपनिषदादावुपलंभतो। उपासनादिनितु साधनाश्रुतौ प्रायः संत्येव। अतएवयुणोपपत्तेः हारेपादेउपासनानिर्मुक्तिः पर्यवसितः एवंचसाधनेसोऽयमियंसर्वविद्यासुपासमसमाप्तिः अविर्भूतात्मेति इदमेवस्यात्स्युः प्रभावसूचिस्तिरोभावश्चेति श्रुतिदिशा यदत्रात्रकाशरूपंतस्य दृष्टमस्ति॥ ततः रातस्यासर्वविघ्नमय्यासरस्यासमस्तरूपतः अमंद्रपुर्थकंदृष्टंसर्वज्ञात्वादिरूपमिति महच्छब्दस्यघंटाघोषपुर्थकमसमानुपहार्थसबलोकोधार्थसास्यादिज्ञानेश्वरिग्रंथरूपेणप्रकाशितमित्यर्थः॥ आत्रास्यादित्यत्रसिचःस्थानेयिथमाधकर्मणोरितिसूत्रेणचिणजातः चिणोलुगित्यनेनात्मनेपदस्यलोपोजातः एवंचास्यज्ञानेश्वरीग्रंथस्यसर्वेदरहस्यरूपत्वात्॥ धान्यांपदबाक्यप्रमाणादिभिःश्रुतितत्वघोतकानांशास्त्राणांयावद्भसंख्याअस्ति॥ तथाचपाणिनिप्रोक्तंव्याकरणमेकं॥ गौतमकणादप्रोक्तन्यायशास्त्रंद्वितीयंपूर्वोत्तरमीमांसारूपंशास्त्रद्वयंचसांख्यंपंचमंशास्त्रंयोगशास्त्रंषष्ठंएवंशास्त्राणांयावद्भसंख्यास्तितस्याःयेपूर्वेप्रवर्तकाचार्याः॥ पाणिनिगौतमप्रभृतयःतेसर्वे

अदःज्ञानेश्वर्याख्यंमतःसर्वश्रुतिरहस्यरूपंमेमंतंअतःअजंतु॥ अनुसरंतु॥ अत्रप्रार्थनायांलोट्॥ अत्रशास्त्रंषष्ठसंख्यायांव्याकरणंकचिद्भुयंगमितिवदंतितत्रगौतमकणादप्रणीतंशास्त्रंषष्ठमग्राह्यं॥ एवंचयेमेमतंप्रजिघ्रंतितेषांमहालयस्थानस्थेमंतमहाश्रीःमहातेजश्रीःसंगतंकल्याणंकरोत्वितिशेषः॥ लक्ष्मीःपद्मालयापद्माकमलाश्रीहरिप्रियेत्यमरः॥ कल्याणंमंगलंशुभमित्यमरः॥ सन्मलयरमोत्तमाकृष्टाःपूज्यमानेरितिसूत्रेणमहाश्रीरित्यत्रसमासःअन्महतःसमानाधिकरणजातीयेरितिसूत्रेणमहच्छब्दस्यादेशःमहालक्ष्म्याधिष्ठितमितिपुराणेउक्तमस्ति॥ एवंचात्रषष्ठशास्त्रकैश्चेतस्कंतेमतंअजंतुइत्यनेनेनाधिकारिणिकृतः तथाचमेषांषष्ठशास्त्रेगतिरस्तितेएवज्ञानेश्वर्यांअधिकारिणइत्यर्थः॥ अदःइत्यंगुलिंनिर्देशेनपूर्वश्रुतिरूपंतेजःउक्तंतदेवनमुखान्निर्गतमितिविजयोदाहरिष्यएवंचश्रुतिसारभूतेअस्मिंज्ञानेश्वर्यांविजयोस्तीतिदार्ष्टांतमित्यर्थः॥ श्रीनैगलंददातुरसनेनफलंदर्शितमित्यर्थः॥ तथाचपेएतन्मतंअनुसरं

॥२९॥

॥२९॥

तेषामियमेव महालक्ष्मीः कल्याणरूपमाक्षादिपालं ददातीतिभावः संबंध सुसंबंधविधयोः प्रतिपाद्यप्रतिपादकभावरूपः॥ अधिकारिणः प्रमेो जनस्य प्राप्यप्रापकतारूपस्यदातिभाव्योगंकल्पनियः एवंचात्रपिता महरूपनेन ब्रह्मसंबंधउक्तः जगद्गुरोरुमेनाशिवसंबंधउक्तः द्वितीय श्लोकेविष्णुरूपेशानेश्वरात्सकाशादनिर्गमेनसाक्षाज्ञानेश्वरीरूपेणे मंज्ञानश्वरीलोकेधारयंतीत्यर्थकेप्रकटरूपाजातेतिगम्यतइतिभावः पुराणेभागिरथः ब्रह्मविष्णुमहेश्वरसंबंधउक्तः अंतेविष्णुपदानि गतइतितत्रौचेत्यकथनमासि॥ एवंयात्रायौचीदेश्वरायेत्यत्राअभ्याहृतं पूर्वमितिन्यायेनशिवबोधकंपदमुक्तंअंतेमहाश्रीरितिशक्तिबोधकंप दमुक्तं॥ चीदेश्वरायनमः मंगलंमहाश्रीरित्यादिनाकर्तृत्वदातृत्वादिध र्मिश्वरेनसंतिकिंतुराज्ञावेधशिवस्येश्वरस्यभजनमेवकर्तव्यमिति सूचितमितिभावः यद्यपिपरासुतछुतोरितिसूत्रेईश्वरस्यकर्तृत्वमुक्तं प्रकृत्यमतउपपतेरितिसूत्रेश्वरस्यफलदातृत्वमुक्तमासीतथापितदोपाधिकं ननुवास्तविकमितिमाध्वकुग्रहोक्तत्वात्॥ इतिप्रथमवर्णकं॥ ननुअत्रम थमेवाडविधलिंगैस्तालसंधारणेनमंगलरूपोर्थः॥ प्रतिपादितःतथापिअथंतोऽपि

पूर्ववदुं नमइत्यत्रभंगत्रयः कायंपितामहेनब्रह्मणापूर्वतारकां क्रांतकालेयत्सदादिरूपंजगद्गुरोः शिवस्यतथादेव्याश्चादिशक्तेः वि वार्धतेजोंशःस्वेनकृतायादृष्टद्वयाप्रतिमातांप्रतिआहितं॥ आत्रा रवंउवातिनिपदस्यसंसादितिपदस्यचार्थः पूर्वंतसदानंदरूपः कार्यः प्रतिमत्यत्रहूतिपातुपूर्वंबहुकृत्यानजुपुराणेषुब्रह्मणाशिवशक्त्योः प्र तिमांदृष्टरूपांकृत्वातत्रतत्तज्ज्योति।स्थापितमित्यर्थस्तुनोपलभ्यतेइतिचे न्नामत्रार्थस्तुअक्षेपलभ्यः तथाचपूराणेषुयस्यमंत्रदेवतासाक्षात्कारो जातस्तन्मूर्तिस्तेनतत्रस्थाप्यतेइतिवर्ण्यते। कुत्रचिन्नवर्ण्यतेतथा पिअक्षेपाद्ग्राह्यं॥ एवंअत्रापिब्रह्मणस्तोत्रेणशिवशक्तीआविर्भूते ततः ब्रह्मनेवरदेचजातइत्यर्थस्तुपलभ्यतेअत्रेब्रह्मणासंस्तुतः ब्र ह्मेश्वरइत्यत्रार्थाद्ब्रह्मस्थापितालिंगंब्रह्मेश्वरोग्राह्यः ब्रह्मकृताशक्ति प्रतिमातुपूर्ववर्णकेस्थदमुक्तासिअतोस्तिन्यथेवेधादोनेथकार्यः॥ एवंपूर्वकंमंत्रेजपेनयोगैःसाधनैर्मयिलिङ्गकृताअस्मापासनोदि भिर्मनहृदयेज्ञानाख्योमहाप्रकाशोजातइत्यर्थः॥ ततःशक्त्याज्ञान

त्मात्मामयआदः पाने श्वर्यरिव्यं मश्रंआस्यं दिपूर्वैसवैआचार्यैते मेअदः म
त्रं ब्रजंतिति पूर्ववद्वन्दमः कार्यः॥ एवंचात्रगायत्र्यर्थउपलभ्यते॥ तथा
चो नमस्त्रयधीमहीत्यस्यार्थो हेमजगद्गुरोःअस्मंउवातिविधीमि
त्रत्रतत्सवितुरित्यादिप्रदानामर्थोज्ञेयःउत्तरश्लोकेतुधियोयोनः
त्यादिपदानामर्थोज्ञेयःअनेनैवाभिप्रायेणतेनेत्रंहदायआदि
कवयेत्रगायत्र्यर्थोदर्शितएवंचास्यगायत्र्यर्थत्वेनमहामंगलत्व
पार्थत्वात् अदःमतंमेअनुसरंतितानप्रतिमहाश्रीःमंगलंपरमंच ॥२३॥
॥२२॥ सुखार्थंददातुएवंचमंगलंददातित्रत्रात्रिवारंवाबलकमपिमंगलंमंग
लेत्यादन्युक्तमस्ति॥ एवंचादौनिमस्क्रियावस्तुनिर्देशेत्यादिवा
क्येनत्रिधापिमंगलमत्रकृतं॥ तथाचोनमस्त्रत्रत्रयंनमस्कारात्म
कंमंगलंकृतं॥ मध्येसच्चिदानंदाकृतंतत्पदार्थबोधकपदैःवस्तुनिर्देशेन
मंगलंकृतंअंतेमंगलंमहाश्रीरित्यत्रमंगलस्यस्पष्टनिर्देशोपि
आशिर्वादात्मकंमंगलंकृतंएवंचात्रसर्वत्रमंगलस्यसर्वत्रोप
लभ्यमानत्वादस्यानुष्ठानंयेकुर्वंतिवाअस्यपरिशीलनंयेकुर्वं

तिवेशान्मतंतन्नुसरंतितान्प्रतिमहाश्रीमंगलंददातिति अ
सकृद्वृत्तिमितिभावननुमदादःमतंपूर्वैआचार्यैअनुसंरत्वि
त्युक्तंतैःकथमनुसर्तव्यंतदुक्तव्यमितिचेत्दाह॥ धाम्नांया
षट्कसंख्यास्तितस्याःयोगैरितिसर्वत्रयोज्यं॥ योगैरितिपुन
र्याज्यं॥ तत्रयेपूर्वेनैय्यायिकाःतेषांमतेधाम्नांद्रव्यगुणकर्म
सामान्यविशेषसमवायरूपपदार्थानांयाषट्कसंख्यातस्या
योगैःसाधनैःप्रमाणैःप्रत्यक्षानुमानोपमानशाब्दाख्यैःअदः
ब्रजंतिति भावः॥ ननुतेषांमतेऽभावाख्यःसप्तमःपदार्थो
स्तिति चेत्तस्याभावरूपत्वाभावेनात्रनगृहीतःअतसांख्यशा
स्त्रेपिनत्रयंषट्पदार्थवादिनोवैशेषिकादिवत्इत्यस्मिन्सू
त्रेवैशेषिकाःषट्पदार्थवादिनइतिस्पष्टमास्ति॥ ननुगौतमेनो
क्तषट्पदार्थः॥ अतःकथंषाडिमुक्तमितिचत्षट्पदार्थेष्वनोक्त

षपदार्थानां तत्त्वविवेकेन कृतः॥ पुनरपि ये पूर्वे पूर्वेतरमीमांसा
प्रवर्तकाचार्यास्तेषामाम्नायप्रमाणानां यावद्धि संख्यास्ति तस्याः तमे
त्यर्थः अत्र पंचमी तृतीयार्थे वक्तव्या योगैरिति पदं पुनर्नयोज्यं
॥ तथा च पूर्वतरमीमांसकाराणां मतेषट् प्रमाणानि प्रत्यक्षानु
मानोपमानशब्दार्थापत्त्यनुपलब्ध्याख्यानि संति॥ नैय्या
यिकानां मते तु चत्वार्येव प्रमाणानि प्रत्यक्षानुमानोपमान ॥२४॥
तभावैकुंठैतिअनुपलब्धेस्तुअभावप्रत्यक्षे॥ सांख्ययोग
मतेतु प्रत्यक्षानुमानशब्दरूपाण्येव प्रमाणानि संति॥
तथा ये योगिनः संति ते तु धाम्नांआधारचक्रादिरूपस्थाना
नां यावद्धि संख्यास्ति तस्या योगैः गमनोपायैः अदः अजं
त्यन्वयः॥ तथा चात्रये सांख्याः ततुधाम्नांतत्त्वगणानांयाव

द्धिं संख्यास्ति तस्याः योगैः साधनैः प्रमाणैरित्यर्थः अदः अजंत्यन्वयः॥

तथा चतन्मते॥ पंचभूतानीति एको गणः पंचविषयाइति द्वितीयः पंच कर्मेंद्रियाणीति तृतीयः पंच ज्ञानेंद्रियाणीति चतुर्थः मनोपृथगेकाराख्यातः करणरूपः पंचमः प्रकृतिपुरुषरूपः षष्ठः॥ ननु सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोहंकारोहंकारात्पंचतन्मात्राण्युभयमिंद्रियं तन्मात्रेभ्यः स्थूलभूतानिपुरुष इति पंचविंशतिर्गुणइत्यस्मिन् कपिलप्रणीतसूत्रेपंचविंशतितत्त्वानिउक्तानिसंतीति चेत्तेषामुक्तसंख्यास्थलेतभिन्नाद्वौवौनास्ति॥ एवं च कणादगौतमजैमिनिव्यासकपिलपंतजलिभिः षड्शास्त्रकर्तृभिः स्वस्वसमयोक्तप्रमाणादिभिर्मिमतमनुसर्तव्यमितिभावः॥ भगवद्गीतातु सर्वशास्त्रमयीअस्तितत्रचैषयः व्याख्यानंकृतंतत्रध्याख्याने षड्शास्त्राभिप्रायाः संत्येवतथापि मयाज्ञानेश्वरीरूपव्याख्यानेषड्शास्त्राविरोधेनव्याख्यानंकृतमितिविशेषोस्ति अतः अदः मतसर्वैर्मनुसर्तव्यमितितात्पर्यः एवंमतेषांपदानांमतसाम्प्रदाय

शास्त्रादौ योजनाकार्या एवंचपूर्वैर्ये सर्वेआचार्याः संतितैरनुसर्तव्यमिति भावः एवंज्ञानेश्वर्यौ तत्र तत्र विस्तारे कृते सर्वेषामपि उपलब्धिर्भवतिअतएवज्ञानेश्वरैरेषादृश्याध्यायेउक्तं ॥ जेउपनिषदाहे वेसार सर्वशास्त्रांचेमाहेरपरमहंससरोवरतेविजेजेरति ॥ एवंशास्त्रमयमंगलस्यद्विधालिंगानिज्ञापकानिमंगलरूपोर्थः कुतःअयंचयथामयाकृतःविघ्नजिहतेतदपेक्षयाविशेषेणापिकार्यः ॥

एवंचयस्यस्यार्थस्यलिंगदृश्यतेतत्तदर्थानुसारेणार्थःकार्यः ॥ ॥२५॥

अथग्रकाशनसामर्थ्यहिलिंगं ॥ तथाचात्रादौॐनिसूत्रमंगलरूपगणपतेर्निर्देशः ॥ वीरेश्वरइत्यत्रशिवस्य ॥ जगद्गुरोरिसंबंधिछोः ॥ बिंबइत्यादौजोवाचकशब्दैःसूर्यस्यमहश्रीरित्यादेर्व्यानिर्देशोस्तिअतःपंचमतानिअस्योक्तानिअतःतदविरोधेनार्थःकार्यः ॥ अत्रचेयंतर्कसंगतिः ॥ ॐकारपूर्वकंग्रथमंनमस्कारःकृतःततःग्रथमश्लोकेविषयःकथितः ॥ द्वितीयश्लोकःसाधनं ॥ ततो

तेफलंकथितं ॥ तथापिअर्थानुरोधात्सामन्वयःकार्यः ॥ अत्रपितामहश्लोकेनग्रलंणानिदेशाः वीरेश्वरइत्यनेनशिवस्यजगद्गुरोरिसंबंधेनविष्णोर्निर्देशाः ग्रथमेअर्थेकृतः ॥ द्वितीयार्धेबिंबइत्यादिभिर्निर्गुणंग्रलंग्रतिपादितं ॥ तस्यतेजसइत्यादिनासगुणजडसंबंधेनजीवनिर्देशः ॥ संसारनिर्देशोपि ॥ तृतीयार्धेतुग्रत्यायोगेरिसूत्रेणग्रकृतिनिर्देशः साधननिर्देशोपिकृतः ततोविद्वत्सूत्रेणपरोक्षज्ञानंअदःग्रजांलिसूत्रेणापरोक्षज्ञानं ॥ मंगलंमहाश्रीरिसूत्रविषयापरमपुरुषार्थः कथितः एतानिपुराणलिंगानिसंति ॥ पुराणेष्वपिआदौमंगलंक्रीयते ॥ तत्रापिग्रलविष्णुमहेशाःजगत्उत्पत्तिस्थितिलयकर्तारइत्युच्यते ॥ निर्गुणग्रलग्रकर्णमध्येमध्येआस्तेव ॥ कुत्रग्रकृतिपुरुषसंबंधोपिवर्ण्यतेतथाजीवदशा ॥ संसारः ततःसाधनानितैःपरोक्षपरोक्षज्ञानं ततःपुरुषार्थोपि ॥ तथाजगद्गुरोःसकाशाद्ग्रलयोवेदाग्निरपिवर्ण्य

॥२५॥

तेऽतःपुराणानुरोधेनार्थः कार्यः॥ तथाच दातलिंगाच्यपि संति॥ तथाच ब्रह्मविष्णुमहेशानिदेशैः जगत्उत्पत्तिस्थितिलयकर्त्रीत्रिगुणात्मकप्रकृतिमभ्युपेत्येन जन्माद्यस्ययतइत्यस्यार्थोजातः तटस्थलक्षणमुक्तं॥ बिंबादास्यजगदुत्पत्तिसंबंधेनशास्त्रयोनित्वादित्यस्यार्थोदर्शितः॥ ततःअक्षेपलभ्यौसमन्वयाविरोधौतथायोगैरिलादिभिः साधनानिदेशाः ताडिद्वियादिभिशानिदेशाः मंगलंश्रीमहाश्रीरित्यत्रफलनिदेशाः एवंमिमांसे ॥२६॥ दांतमीमांसायांचतुर्थाध्यायेषुयथोक्तंतथाः प्रपीतिभावः तथाचात्र ब्रह्मजिज्ञासेत्यत्रलोट्विध्यर्थेवक्तव्यः तथाचजिज्ञासाकर्तव्येतिनदर्थस्यतु॥ विधिस्तुत्रिविधः॥ अपूर्वविधिः नियमविधिः परिसंख्याविधिश्चेति॥ तत्राप्राप्तस्यप्रापकोयोविधिः सअपूर्वविधिः यथाव्रीहीन्नहंतीत्यवघातनंयद्यपिलोकतः प्राप्तं कुतःअवहननेवस्त्रनखविनाप्युरोडाशस्यासंभवात्अर्थादवहननस्यप्राप्तिरागतातथापि

MEMORIAL

अवहननवस्त्रनखविदलनेनाविनुबाधाकरणंजायतेनतुबाधाकरणेआदाचिदवहननस्याप्राप्तिरागतःअतःअतअनेनवाक्येननियमःकृतःअतोयंनियमविधिः॥ उभयोर्नियम्यप्राप्तौसत्यामेकस्यप्राप्तकोयःसपरिसंख्याविधिः इमामगृण्नरशनामृतस्येत्यादिनाश्वगर्भारशनयोर्ग्रहणस्यनियम्यप्राप्तौसत्यांजातायाअश्वाभिधानिसादसद्भावेनाश्वरशनाग्रहणमेवकर्तव्यमितिजातंअत्रतुजिज्ञासाकर्तव्येतिवाक्यस्यविधिः कर्तव्यः॥ तथाचास्यवाक्यस्यब्रह्मविचारात्मकशास्त्रत्वात्तद्नुबंधचतुष्टयंज्ञेयं॥ तत्राधिकारीतुविधिवदधीतवेदवेदौवेदाधीतौतदर्थावगतिरिहलोकेदार्थेस्मिन्जन्मनिजन्मांतरेवाकाम्यनिषिद्धवर्जनपुरःसरंनित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेननिर्गतनिखिल

कल्मषतयानितांतोनिर्मलः स्वांतः साधनचतुष्टयसंपन्नः प्रमाता॥ साधनचतुष्टयंतु॥ नित्यानित्यविवेकइहामुत्रार्थफलभोगविरागः शमादिषट्कंतु॥ शमादिषट्कंतु॥ शमदमोपरतितितिक्षासमाधानश्रद्धारूपंज्ञेयं॥ अस्यांतरंगसाधनत्वादधिकारिविशेषणमिदं॥ अतएवोक्ततृतीयाध्यायेशमादयुपेतः स्यात्तथापितुतद्विधेस्तदंगतयातेषामवश्यानुष्ठेयत्वात्॥ सर्वापेक्षायज्ञादिश्रुतेरश्ववदिति॥ तानुबहिरंगाणि प्रायेणसाधननिर्देशः॥ एवंचात्रविषयस्तुजिवब्रह्मणोरैक्यं॥ संबंधस्तुपूर्ववदेव॥ फलंतुअविद्यानिवृत्तिब्रह्मसुखाप्तिरेव॥ तद्वदत्रप्रयोजनयोर्भेदभावः॥ ॥२७॥

तथात्रप्रथमश्लोकेवीरेश्वरपितामहजहुरोरितिभिन्नपुरुषबोधकपदैर्भिन्नापुरुषाःप्रतिसांख्यमतवदुपलभ्यते॥ तत्रैवश्लोकेद्वितीयत्वादिपदैःपुरुषस्वरूपंनिर्गुणंसांख्यवदुपक्षभ्यतेहितीयश्लोकेप्रकृतिबोधकपदैःप्रधानमिदंशोभनमितिसांख्यप्रक्रियावदुपलभ्यते॥ संगर्त्तमहाश्रीवीरेत्रयंधमोक्षयोःकश्रीकृतिरितिसांख्यप्रक्रियावदुपलभ्यते॥ अतःकपिलाचार्यैःसांख्यशास्त्रंकृतं॥ रूपैःसप्तभिरात्मानंबध्नातिकोशकारवद्विमोचयत्येकेनरूपेणेति॥ अस्यार्थस्तु॥ प्रकृतिःसप्तभिःरूपैःधर्माधर्मैश्वर्माश्वर्यवैराग्यावैराग्याज्ञानाख्यैःआत्मानंपुरुषंबध्नातिकोशकारवदेकेनज्ञानाख्येनरूपेणात्मानंविमोचयतीत्यर्थः॥ यथासांख्यस्यमतंतथायोगशास्त्रस्यापिमतमस्ति॥ अतएवोक्तंमत्सांख्यप्रवचनंतथायोगैरविगम्यते॥ योगशास्त्रेपि॥ दृष्टृदृश्ययोर्योगोहेयहेतुरित्यादिसूत्रैःसांख्यवन्मतमुक्तमस्ति॥ एवंचात्रसांख्ययोगमतानामुपलम्भमानत्वात्तद्वदेवप्रयोजनमत्रार्थःसांख्यस्तुकापिलःकारणानुमानंकुर्वंति॥

अत एवोक्तं कपिलाचार्यैः आप्तश्रुतिरनुमानेन बोधो धूमादिभिरिव वह्नेः ॥ अनेनैवाभिप्रायेण ॥ स्थूलात्पंचतन्मात्रस्य बाह्याभ्यंतराभ्यां तैश्चाहंकारस्यते नांतःकरणस्यततः प्रकृतेस्तेहेतपरार्थत्वात्सुखदुःखेच्छादिसंघेषु कार्यानुमानेन कारणसिद्धिः कृता ॥ अनुमानं च केषांचिन्मतेध्यात्मविज्ञानं केषांचिन्मते परामर्शः ॥ ध्यासेसुलक्षणान्यनेकानि संति तन्मध्ये पूर्वपक्षे एकं लक्षणमुच्यते ॥ साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकप्रतियोगितावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याभाववान्यः पर्वतमध्येतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वंतादृशवृत्तित्वंतावच्छिन्नप्रतियोगिताकाभावोध्यात्मिकः सिद्धांतेलक्षणंतु ॥ हेत्यधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकावच्छिन्न ॥२८॥ ॥२८॥

साध्यसामानाधिकरण्यं हेतोर्ध्यात्मिकः एतादृशेरनुमानैस्तेकारणंसिद्धिंकुर्वंतीत्यर्थः ॥ एवंवाक्योपक्रमेनमः इत्यनेननमस्कारस्वरूपाक्रियादर्शिताऽतएवमंगलंमहश्रीरसत्रफलंदृश्यतेतेनपूर्वमीमांसकानांमतवत्कर्तृविनाफलंनास्तियुपलभ्यतेतथाचतैरुक्तं ॥ दृष्टोहितस्यार्थःकर्मविबोधनंनामेति ॥ तथातद्भूतानांक्रियार्थेनसमाम्नायः ॥ अम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानामित्यादिभिः ॥ तथापिपदयोजनपातद्द्रव्यत्रार्थः कर्तव्यः एवंचवेदेश्वरपितामहेनजगद्गुरोरात्मादेवेत्यादिपदैः नानादेवतातन्मंत्रबद्धंतेएवंन्यायमतेतथाऽन्यमतेषुपिएतैरेवपदैस्तत्तुल्यरूपेणयोजनाकार्या ॥ यथाशरीरकसूत्रैरनेकमतोपलब्धेर्भवितितद्वदेनमस्कारेतिभावः सूत्रबद्धस्थाने कार्थत्वमात्मसिद्धयर्थः ॥ तथैतस्यानाभिप्रायेणापिअर्थः कार्यःतथाचोनमस्कृत्यादिनापूर्ववंमंगलंकार्यं ॥ ततःविद्यामेनब्रह्मणापूर्वंतारकाक्रमणकालेयथास्मातारकंमहारक्षणरूपकारणात्जगद्गुरोर्दृष्टमत्रत्रिविक्रमादिभिस्मर्त्र

काशाकबोधैः स्तुतिः कृताअथवात्विउमस्यत्रकाशाबोधकपदेलक्षणात्स्यच्च
पदसमूहेलक्षणाएवंपरंपरालक्षणमात्विउक्तेतेनेनस्तुतिः कृतातथाचशाक्च
संबंधोलक्षणा॥साच्चाद्विविधाउपादानगौणीचेति॥अथवापित्रिविधाजहल्लक्षणा
॥अजहल्लक्षणाजहदजहल्लक्षणेति॥तत्रगंगायांघोषः इत्यत्रजहल्लक्षणका
केभ्योदधिरक्षतामितिवत्राजहल्लक्षणासोयंदेवदत्तइत्यत्रजहदजहल्लक्षणागौ
व्यपिद्विविधासुरव्यापरंपरायेतितन्मध्येप्रथमानुशिक्षामाणवकइत्यादौपरंप
राच्चद्वितीयेत्यत्रशक्या॥ततःप्रसन्नभाशात्माशिवेनसाकमत्रास्यंदिधातुनाम
नेकार्थत्वात्तृतनःब्रह्मणास्वहस्तुपांप्रतिमांजगद्गुरोश्चाश्चर्यंउवतिसाद्वा ॥२९॥
धमश्राहितमिसन्नयः॥यतोब्रह्मास्यामेवशिलायांशिवशक्तीसेजोहितंअतःअत्र
धाम्नांमहत्स्थानानांमाघङ्संख्यातितस्यापूर्वेअग्रस्थानेअदःअजंतु॥सर्वेषा
स्थानानांमध्येइंश्रेष्ठंस्थानमितिभावःअथवापृथ्व्यांधाम्नांमहत्स्थानानांमाघङ्
संख्यातितस्यापूर्वेअग्रस्थानेअदःस्थानंअजंतु॥अतःकाशीसमानिदंक्षेत्रंपुरा
णेचर्णितंकाशीतुपृथ्व्यामुपरिभागेशिवेनधारितास्तिअतःपृथ्वीस्थक्षेत्राणांमध्ये
उत्तमंइदंक्षेत्रमितिभावःअतएवशास्त्रेश्वरेतत्॥श्रीगोदावरिचेकुछिदक्षिणति
रि॥त्रिभुवनेकपवित्र॥अनादिपंचक्रोशक्षेत्र॥ऐशेजगन्नेजीवसूत्रमहात्म

असेइत्यत्र॥एवंचयगछंतिताभ्रप्रतिमाश्रीअत्रस्थामहालक्ष्मीःमंगलंददातु।
अत्रपूर्वोक्तार्थभिप्रायेणोद्धारणार्थंयोगशास्त्राभिप्रायेणपदयोजनांकरोमि॥
ॐमित्यादिनापूर्वंचमंगलंकार्यं॥अत्रब्रह्मेश्वरस्वर्गान्प्रतिउपदेशंकरोति॥
पितेति॥पितामहेनब्रह्मणापूर्वंमेदनासिद्धंजगद्गुरोश्वरस्याश्चर्यंउवतिसंम
द्विद्यार्थस्वहस्तदत्तंहेप्रतिमेंस्वस्मस्वस्मपाषाणवज्रउदेहत्रयतिर्थः तत्राहिन
मितिअन्वयः तत्रधाम्नांआधाराद्विस्थानानांअस्मिन्देहमाघङ्संख्यातिं
तस्याअग्रेब्रह्मरंध्रेअदःतेजःब्रजंतु॥कथंगतव्यमितिचेत्तेयोगैःपरंसाध
नैःतथाचाधारस्थानादधिष्ठानचक्रेततःनाभिस्थानेमणिपूरेअगंतव्यंत
त्रकुंडलिनीशक्तिरास्तितमासाद्यंप्राणापानयोगेनपृथ्व्यतत्पभूतस्यनाशो
भवतितत्तास्त्विउत्पातेजोमयिशक्तिर्भवतितयाशक्त्याअनाहतचक्रेगत
व्यंतत्रतजसःलयोभवतितत्रामंडलातिगोभीरुनादोभवतितंतदेव्याः
शक्त्याअग्रेअमंडलपूर्वकंअदःस्थानमस्पंदिः॥एवंयद्ब्रजंतितेषामेवंभ
ताश्रीर्मंगलंददातीत्यर्थः॥अत्रमयागजाननकृपयायथामत्याविरचि
तंन्यूनाधिकमक्षंतंतत्क्षम्यतां॥इतिश्रीज्ञानेश्वरीसाख्यात्मसाक्षा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥ इति श्रीमदाचार्यश्रीहेमचन्द्रविरचितायां लघुप्रक्रियायां कृदन्तः समाप्तः ॥

॥ ग्रं० ॥

DR. BHAU DAJI MEMORIAL

॥ ग्रं० ॥